CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.
Coll.-No. 714

Title Saṃskārakaustubha

CHUNILAL GANDHI VIDYABHAVAN, SURAT

*Shastri Dinmanishankar Pustak-Bhandara*

No.: 714 Subject: Dharmaśāstra

Title: ~~Sams~~ Sanskārakaustubha.

Author: Anantadeva. Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11" by 5" Extent: 59 to 74 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: Begins & Ends abruptly.

लोकाः सर्वान्कामान्पूरयेस्तद्भजे त्वां ॥७॥ त्वत्तः सर्वं त्वं हि सर्वं स्मरारे त्वं गौरीशस्त्वं च नग्नोतिशांतः ॥ त्वं
वै वृद्धस्त्वं युवा त्वं च बालस्तत्किं यत्त्वं मास्यतस्त्वां नतोस्मि ॥८॥ स्तुत्वेति भूमौ निपपात नम्रः विप्रः सदंड
वं घावदतीव हृष्टः ॥ तावत्स बालोखिलवृद्धवृद्धः प्रोवाच भूदेव वरं वृणीहि ॥९॥ तत उत्थाय हृष्टात्मा
मुनिर्विश्वानरः कृती ॥ प्रत्यब्रवीत्किमज्ञातं सर्वज्ञस्य तव प्रभो ॥१०॥ सर्वांतरात्मा भगवान्सर्वः सर्व
प्रदो भवान् ॥ याच्ञां प्रतिनियुंक्ते मां किमीशो दैन्यकारिणीं ॥११॥ इति श्रुत्वा वचस्तस्य देवो विश्वा
नरस्य ह शुचेः शुचिव्रतस्याप शुचिः स्मित्वाब्रवीच्छिशुः ॥१२॥ बाल उवाच ॥ त्वया शुचेः शुचिष्मत्यां
योभिलाषः कृतो हृदि ॥ अचिरेणैव कालेन स भविष्यत्यसंशयः ॥१३॥ तव पुत्रत्वमेष्यामि शुचिष्म
त्यां महामते ॥ ख्यातो गृहपति नाम्ना शुचिः सर्वामरप्रियः ॥१४॥ अभिलाषाष्टकं पुण्यं स्तोत्रमेतन्म
त्वयेरितं ॥ अब्दं त्रिकालपठनात्कामदं शिवसंनिधौ ॥१५॥ तत्स्तोत्रस्य पठनं पुत्रपौत्रधनप्रदं स
र्वशांतिकरं चापि सर्वापत्परिनाशनं ॥१६॥ स्वर्गापवर्गसंपत्तिकारकं नात्र संशयः ॥ प्रातरुत्थाय सु

सं०कौ० स्नातोलिंगमभ्यर्च्यशंभवे ॥१७॥ वर्षंत्रपवित्रिदेस्तोत्रसपुत्रःपुत्रवान्भवेत् ॥ वैशाखेकार्त्तिकेमाघेविशे
५८ षनियमैर्युतः ॥१८॥ यःपठेत्स्नानसमयेसलभेतसकलंफलं ॥ कार्त्तिकस्यतुमासस्यप्रसादादहमव्य
यः ॥१९॥ तवपुत्रत्वमेष्यामियस्त्वन्यस्तत्पठिष्यति ॥ अभिलाषाष्टकमिदंनदेयंयस्यकस्यचित् ॥
२० गोपनीयंप्रयत्नेनमहावंध्याप्रसूतिकृत् ॥ स्त्रियावापुरुषेणापिनियमाल्लिंगसन्निधौ ॥२१॥ अ
ब्देनप्रमिदंस्तोत्रंपुत्रदंनात्रसंशयः ॥ इत्युक्त्वांतर्देधेबालःसोपिविप्रोगृहंगतः ॥२२॥ इतिश्रीस्कंद
पुराणेकाशीखंडेविश्वेश्वरस्तोत्रंसंपूर्णं ॥ ॥ एवमपिफलाप्राप्तौदत्तकपुत्रस्वीकारंकुर्यात् ॥ अथद
त्तकेग्राह्याग्राह्यविवेकः ॥ तत्रशौनकः ॥ ब्राह्मणानांसपिंडेषुकर्त्तव्यःपुत्रसंग्रहः ॥ तदभावेसपिंडेषु
अन्यत्रतुनकारयेदिति ॥ अत्रचसपिंडेष्वपिभ्रातृसुतोमुख्यः तदभावेततदभावेसगोत्रःसपिंडो
पियःकश्चित्सगोत्रःसपिंडः तदभावेत्वसपिंडःसगोत्रः तदभावेसपिंडोऽसकगोत्रोपि ॥ तत्रापि राम०
भागिनेयदौहित्रवर्ज्जं विरुद्धसंबंधौ पत्न्यांपुत्रत्वबुध्यनर्हं भ्रातृपितृव्यमातुलवर्ज्जंच ॥ त्रया ५८

तदभावेत्व

देशा

णांवर्णानांस्वसमानवर्णाएवतत्रापिभेदः पुत्रकगुर्जरत्वादिजात्यासमानजातीयाएव ॥ सर्वोपिसभ्रात
काएव ॥ ज्येष्ठभिन्नस्य ॥ श्रेष्ठस्यतुभागिनेयदौहित्रावपिग्राह्यौ ॥ अत्रप्रमाणं ॥ भ्रातॄणामेकजाता
नांएकश्चेत्पुत्रवान्भवेत्सर्वेतेतेनपुत्रेणपुत्रिणोमनुरब्रवीत् ॥ एकजातानामित्येवसिद्धेभ्रातृ
पदंसोदरत्वेपिभ्रातृभगिनीनांपरस्परपुत्रनियमोनभवतीतिज्ञापनार्थं ॥ एकजातानामित्यंभि भ
न्नोदराणांएकपितृकाणामपिसपिंडत्वलाभ दर्शायां भ्रातृपुत्रनियमोनभवतीतिज्ञापनार्थंन
तुभिन्नोदरभ्रातृसुतस्याग्राह्यत्वज्ञापनार्थंब्राह्मणानांत्रितयेनास्तिभागिनेयःसुतःक्व[illegible]दितित्व चि
द्गोतमस्मृतिवत् ॥ तन्निषेधःस्मृतेःक्वाप्यनुपलंभात् ॥ ॥ एकइतिराकोपीत्यर्थः ॥ तेनद्वयोरपि
घ पुत्रत्वेअन्येषामपुत्राणांनभ्रातृपुत्रग्रहणासंभवः ॥ पुत्रवानितिमत्रपुत्रोपुत्रवत्वादिद्वंतेयस्येति
मनुपंक्तीकृत्यनत्वेकंपुत्रंदद्यादितिनिषेधस्यात्रानवकाशइतिकेचित् ॥ तन्न निषेधबाधशा
स्य स्त्रस्मृत्यंतरेक्वाप्यनुपलंभेसतिशास्त्रविरुद्धहठात्तात्पर्यवर्णानंसंभवात् ॥ पुत्रवानितिमतुपाएक

ते

सं.कौ. हानिंपदे भट्टपादोक्तन्यायेन संख्याविशेषोदासीनपुत्रविशिष्टतामात्रप्रदर्शनाच्च। न चात्र दृष्टान्तेऽस्मु
६० ख्यत्वात्। सोऽस्तु पुत्रनिषेधप्रवृत्तिरिति शंक्यं। प्रकृते दृष्टान्तेऽमुख्यताया अनुपदमेव निराकरिष्यमा
णत्वात्। पुत्रपदं चौरसपरं जनकपुंस्त्ववाचिनः पुत्रवर्हैस्य तत्रैव मुख्यत्वात्। तेन भ्रातृपुत्रस्यापि ५८
दत्तकविधिः भ्रातृत्वमतोऽपि न ग्रहणं। उत्तरार्धे तु तेनेत्येकवचनात्। पुत्रिण इति बहुवचनाच्च। बहवो
ष्येकं युगपत्प्रतिगृह्णीयुरिति युगपत्प्रतिग्रहेण द्रौपदीभार्यात्ववत्। द्व्यामुष्यायणत्ववच्च विल
क्षणानेकनिरूपितपुत्रत्वफलकस्य सत्त्ववत्परस्परसहितसर्वभ्रात्रधिकारिकस्य प्रतिग्रहवि
धेरिहाक्षेप इति केचित्। तन्न। भ्रातुः पुत्रोऽस्त्येतैः प्रागेव पुत्रप्रतिग्रहादिना भ्रातृपुत्रग्रहमनि ण
च्छति कस्मिंश्चिद्भ्रातरि। इच्छतोऽप्येकस्य भ्रातृपुत्रप्रतिग्रहानापत्तेः। अन्ये तु नैवात्र प्रतिग्रहवि
धिरनुमीयते किंत्वकृतस्यैव भ्रातृपुत्रस्य अपुत्रस्य पितृव्यपुत्रत्वं विधीयते तेन पुत्रवत् श्राद्धा। रामः
धिकाराधिलाभः तथा च बृहस्पतिराचार्यः अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत्। स एव तस्य कुर्वी ६०

दि

त श्राद्धं पिंडोदकक्रिया इति। बृहस्पतिरपि। यद्येकजाता बहवो भ्रातरस्तु सहोदराः। एकस्यापि
सुते जाते सर्वे ते पुत्रिणः स्मृताः। बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः। एका चेत्पुत्रिणी तासां स
र्वासां पिंडदस्तु सः इति। अत्र सापत्न्यपुत्रस्याग्रहीतस्यापि पिंडदानाधिकारित्वात् पितृपत्न्यः स
र्वा मातर इत्यादिशास्त्रलोकव्यवहाराच्च पुत्रत्वं निर्विवादं तत्सहपाठाच्च। भ्रातृपुत्रस्याप्यगृहीत
स्यैव पुत्रत्वं विधीयत इत्युचितं। अस्ति चोक्तं मनुवाक्येनापि सह पठितं सापत्न्यपुत्रस्याग्रहीतस्यापि
पुत्रत्वविधायकं वाक्यं तदर्शं सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत्। सर्वास्तास्तेन पुत्रेण पुत्रिण्यो
मनुरब्रवीत् इति। तदापि न अपुत्रस्यैव भ्रातृपुत्रस्य पुत्रत्वे त्रयोदशपुत्रापत्तेः। तत्र च पुत्रान्द्वादश या
नाह नृणां स्वायंभुवो मनुः तेषां षड् बंधुदायादाः षडदायादबांधवाः इति द्वादशसंख्याविरोधात्
पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुता गोत्रजा बंधुशिष्यसब्रह्मचारिणः इति याज्ञवल्क्यीये
वचसि भ्रातृपुत्राणां भ्रात्रनंतरस्थाननिवेशानुपपत्तेश्च तेषां पुत्रत्वे इतरपुत्रवत्पत्न्याः पूर्वमेव नि

व

वेशो व्विसात् । आख्यातेन्व भ्रातृणामेकजातानामिति वचो वितानेश्वरेण । भ्रातृपुत्रस्य पुत्रीकारण
संभवे अस्मेषां पुत्रीकारणनिषेधार्थेन पुनः पुत्रत्वप्रतिपादनार्थं स्तुताइत्यनेन विरोधादिति । का त
तत्र्थैं तस्य वचसो गतिरिति चेत् । नापुत्रस्य लोकोस्तिजायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मच
र्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इत्यादिश्रुत्या बोधितस्याप्रजस्य प्रयुक्तदोषस्य निवृ
त्तिः । पुत्रकार्यभूतावश्यश्राद्धपुत्रभिन्नेनापि भ्रातृसुतेन पुत्रपितृव्यस्य भवतीति ज्ञापनार्थं । संगच्छ
ते चैकस्यापि सुते जाते इत्यर्धेन कः पुत्रवान् भवेदिति च जननमात्रेण सत्तामात्रेणचेतरेषां पुत्रव
त्त्वसंकीर्तनं उचितं चैतत् । स्वपुत्रेणेव भ्रातृसुतेनापि समस्तपितॄणां पिंडोदकक्रियानिर्वाहस्य वंश
विच्छेदपरिहारस्य च संभवात् । इत्थं च भ्रातृणामिति सर्वे पुत्रिण इति च बहुवचनं तावतो वारुणा
नीतिवत्प्रयत्नीयेन यः ज्येननितिवचनपर्यासंभवात् प्रबंधत्वानुवादः उक्तज्ञापनस्य फलं रा०म०
केवलं परस्तोकार्पितया भ्रातृपुत्रवतो पुत्रस्य दत्तकादिस्वीकारप्रवृत्तिनिरासः पत्नीदिभ्यः पुर्वं स ६१

या

धि क्ष

हीयपिंडदानरिक्थादिकारी कश्चिद्भवेदिति कामनायां भ्रातृपुत्रस्यैव दत्तकविधिना स्वीकारः
सिद्धिरप्यर्थाज्ज्ञापमाना भवति वाक्यस्य प्रयोजनं । अप्रजत्वदोषनिवर्तकत्वया पुत्रसदृशस्यैव पुत्रप्र
तिनिधित्वेन स्वीकारणमुचितमिति विषादृप्रतिनिधिन्यायादेव सिद्धेः सवंचसठिन मन्वादिवाक्येषु अश्रु
तप्रतिग्रहादिक्रियाकल्पनेऽक्लेशः नापि मिताक्षरादिग्रंथविरोधः नापि याज्ञवल्क्यादिवाक्ये भ्रातृसुता
नां पंचमस्थाननिवेशानुपपत्तिः पुत्रत्वेनाकृतानां भ्रातृसुतानां पत्न्यादिषु सत्सु पुत्रकार्यभूतपैतृक
ऋणवारणकारित्वासपिवचनात् । रिक्थग्रहणाधनधिकारसंभवात् पुत्रत्वेनकृतानां तु संभवति
तदधिकारः संगच्छते चैवं सति कालिकापुराणेऽप्य करसुतयोर्वेतालभैरवयोर्नादिवाक्ये न पुत्राजने
प्रवृत्तयोर्मध्ये भैरवेणोर्वंशपामुत्पादितपुत्रस्य तद्भ्रातृवेतालेनापि पुत्रत्वेन स्वीकारणं ततः कदा
चिद्दुर्वंशपं भैरवं मैथुनं गतः तस्यां स जनमायासुसुवेन्ं नाम पुत्रकं । तमेव चक्रे तनयं वेतालोपि स्व
कं सुतं इति अत्र च स्वसुतकार्यकारित्वेन तमेवाश्यमन्येतेतिपद्यार्थः क्रियंते यदेवाप्रतिग्रहेणास्व

सं·कौ· ६२ सुतत्वं संपादितवानिति । उभयपापिरातस्मिन्मतेन क्षति । भ्रातृसुताभावे पूर्वोदाहृतशौनकवा-
क्यादेवप्राप्त्यसपिंडसंभवे सगोत्र एवेति नियमामाह वृद्धगौतमः । स्वगोत्रेषु कृता येसु दत्तक्री ता
दयः सुताः विधिना गोत्रतां याति न सापिंड्यं विधीयत इति । गोत्रतां संततिं । संततिर्गोत्रजननकुला-
निति त्रिकांडस्मरणात् । गोत्रापेक्षया सपिंडसगोत्रासंभवे असगोत्रः सपिंड एव ग्राह्यः । शौनकोक्त-
वचने उत्तरार्धे सपिंडाभाव एवासपिंडनियमात् । गोत्रापेक्षया सापिंड्यस्य प्रत्यासन्नतया तत्कृतसादृ-
न श्यस्य बलवत्वाच्च । सर्वथा सपिंडालाभे समानगोत्रस्यैव ग्रहणं । अनंतरोदाहृतवृद्धगौतमवच-
सैव सिध्यति । न सापिंड्यं विधीयत इति चतुर्थपादोक्तनिषेधस्यासपिंडसगोत्र एवासंभवात् । सगोत्रा-
लाभे असगोत्रोपि । दत्ताद्यापि तनया निजगोत्रेण संस्कृताः । आयांति पुत्रतां सम्यगन्यबीजसमु-
द्भवा इति कालिकापुराणात् । गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः । इति मानवलिंगाच्च । दत्तक्री- राम· ६२
तादिपुत्राणां बीजवप्तुः सपिंडता । पंचमी सप्तमी तद्वद्गोत्रं तत्पालकस्य चेति । इह मनुवाक्ये सा-

अ

पिंडगोत्रयोर्व्यवस्था विधानाच्च ॥ असगोत्रेष्वपि ॥ भागिनेयादिनिषेधमाह ॥ शौनकः । दौहित्रो
भागिनेयश्च शूद्राणां विहितः सुतः ॥ ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचिदिति । पूर्वार्धे भा-
गिनेयस्य दौहित्रसाहचर्यादुत्तरार्धे भागिनेयपदं दौहित्रोपलक्षणार्थं पुत्रत्वबुध्यनर्हभ्रात्राद्यु-
पलक्षणार्थं च । समानवर्ण एव ग्राह्य इति नियमस्तु पूर्वोदाहृतशौनकवाक्ये अमत्र तु न कार्यो दि-
ब्राह्मणे तिचरणे नैब्राह्मणामैथुनकर्तव्य इत्यर्थकेन लभ्यते । तथा क्षत्रियाणां स्वजातौ वा गुरुगोत्रसमेपि वा
। वैश्यानां वैश्यजातीषु शूद्राणां शूद्रजातिषु । सर्वेषां चैव वर्णानां ज्ञातिष्वेव न चान्यतः इति शौनककल्प-
वचनाच्च । विशेषवचनैरेव समानवर्णत्वनियमे सिद्धे पुनर्ज्ञातिष्वेव न चान्यतः इत्युक्तिः । गुर्जरत्वादि-
नापि समानजातीयत्वनियमार्थं । क्षत्रियेण स्वीकर्तव्यस्य दत्तकस्य समानगोत्रस्यैव चिकीर्षायां पु-
रोहितगोत्रेणैव सामानगोत्रत्वमिति ज्ञापनार्थं गुरुगोत्रेति पौरोहित्यान् राजविशामित्याश्वलायनो-
क्तेः । भ्रात्रादेरेव ग्राह्यत्वमिति सूचितं । शौनकेन । नैकपुत्रेण कर्तव्यं पुत्रदानं कदाचनेति । बहुपु-

सं॰कौ॰ त्रेणकर्तव्यं पुत्रदानं प्रयत्नतइति ॥ ॥वसिष्ठोपि ॥ ॥ नत्वेवैकं पुत्रं दद्यात् ॥ प्रतिगृह्णीयाद्वासहिसं
६३ तानायपूर्वेषामिति ॥ स्पष्टभिन्नोयात्स्वरूपसिद्धमंतरेणस्वरुचितं ॥ नज्येष्ठंपुत्रं दद्यादिति ॥ दौहित्रभा
गिनेयौशूद्रेणग्राह्याविसाह ॥ शौनकः ॥ दौहित्रोभागिनेयश्चशूद्राणांवापिदापयतइतिउक्तविध
दत्तस्वीकारः ॥ पुंभिरिवास्त्रीभिरपिसधवाभिर्विधवाभिश्चकार्यं वंध्यावामृतपुत्रावापुत्रार्थंसमुपो
ष्येचेतिशौनकीयवचनस्याविशेषश्रवणात् ॥ केचित्तु ॥ अपुत्रेणैवकर्तव्यः पुत्रप्रतिनिधिःसदेति ॥ व
अस्मिन्वाक्येएवकारश्रवणात् ॥ पुंस्त्वश्रवणाच्च ॥ नस्त्रीपुत्रंदद्यात्प्रतिगृह्णीयाद्वान्यत्रभर्तुरनु
ज्ञानादिति ॥ वसिष्ठवाक्येभर्तुरभावेस्त्रीणांप्रतिग्रहनिषेधाच्च ॥ नापुत्राणांस्त्रीणांभर्त्रनुज्ञाभावेपु
त्रग्रहणेधिकारइत्याहुः ॥ तदयुक्तं ॥ अपुत्रपदार्थस्याविधेयत्वेहितद्विशेषणपुंस्त्वविवक्षामाश्रित्य
पुंस्त्वश्रवणादितिहेतूपन्यासःसंगच्छे ॥ तस्मात् ॥ ननु तस्यविधेयकत्वं ॥ मुख्याभावेतत्कार्यकारीहिप्र राम
तिनिधिपदार्थः ॥ एवंचैगिरामीरितिश्रूपादिवाक्यबलादेवगिरापदकार्येइरापदविधिवर्जितग्रि ६३

न

ह

रापदनिषेधस्यपाक्षानुवादत्वमाश्रितं तदाकांक्षायोग्यतासहकृतात्पुत्रप्रतिनिधिःकार्यइत्येता
वतोवाक्यादेवापुत्राधिकारिकत्वलाभात् ॥ अपुत्रपदंकथंनानुवादः ॥ तदर्थस्याविधेयत्वाभा
वेचनतयापुंस्त्वविवक्षितेति ॥ किंचविप्रोभवतुपमस्तेहेतू ॥ एवकारश्रवणादेवापुंस्त्वस्यावि
वक्षितत्वात् ॥ ॥अश्वमेधेहि ॥ ॥अतिदेशप्राप्ताधिगुरुवचनेअप्राप्तस्यापिषड्विंशतिपदस्यषड्वि
शतिरित्येवब्रूयादित्यत्रनविधिः एवकारार्थविशेषणत्वादित्युक्तंपूर्वमीमांसायां ॥ तथाअन्ये
वापपतीत्यत्रानंतत्वेचपुत्रत्वानुपस्याप्यावापस्यततएवविधानमाश्रितं ॥ तथोत्तरमीमांसायामप्या
त्मानमेवलौकिकमुपासीतेत्यादौततएवनोपस्यत्वेनात्मविधानमित्याश्रितं ॥ विवरणादौ ॥ एवंचैवका
रार्थविशेषस्यसंभवत्सात्त्विकस्याविधेयत्वेकथंनद्विशेषणपुंस्त्वविवक्षितेतिहृतबुद्धयएवविद्यां
कुर्वंतुयदिपरमेवकारमध्येतेएवरश्मिभिरूर्ध्वआक्रमतइतिवत्कथंचिदयोगव्यावृत्त्यर्थतयानु
वादमाश्रित्यापुत्रपदार्थोविवक्षतेतथापिमलिनःस्यादित्यत्रमलिनपदमिवफलकामनाक्षे

सं.कौ. ६४

पकत्वेनाधिकारिसमर्पकमेव पुत्रपदं स्वीकार्यं। ततश्च सर्वकामादिपदगतपुंस्त्वविवक्षाकषायन्या
येनैव पुंस्त्वाविवक्षासिद्धिरिति प्रथमहेतुद्वयालीकत्वसिद्धिः न चापुत्रपदं विवक्षितं स्वीकुर्मश्च।
स्त्र्यंतरप्राप्तं पुत्रप्रतिग्रहानुवादेन पुंसैव कर्तव्यो न स्त्रियेति परिसंख्यास्त्विति शंक्यं तथा सति स्त्रिया
कर्तव्यं पुत्रप्रतिग्रहं प्रति भर्त्रनुज्ञांगविधेरलीकत्वापत्तेः। नापि द्वितीयो हेतुः। निषेधवाक्यपर्यालोच
नया भर्त्रनुज्ञातस्य प्रतिग्रहांगत्वं वदद्भिर्हि तदंगत्वेन तद्विधिपरत्वस्य वाक्यस्याश्रयणीयं। न चावि
हितमंगं भवतीति न्यायात्। ततश्च पुत्रप्रतिग्रहाय भर्त्रनुज्ञां स्त्री कुर्यादिति विधिर्यमधिकारिणं
प्रवर्तयन्नियमविधिना मा प्रद्यते यश्च विधिविषये समर्थस्तमेवावगाहत इतिमसधवां प्रसेव
तस्य प्रवृत्तिः। तस्यामेव नियमोपजीव्यपर्यक्षिकप्राप्तेः संभवात्। तथैवानुज्ञास्वीकारस्यग्रक्कता
त्र। स्वीकृतं हि विनैव विशेषणं नियमविधित्वलाघवानुरोधेनैव विशेषविषयत्वमुपाश्रुपजु राम. ६४
षेत्यत्र द्वितीये। एवं च यथापक्षातेकर्मनिर्वर्त्य वैश्वदेवं तु साग्निकः। पिंडयज्ञं ततः कुर्यात्ततोन्वाहा

र्यकं बुध इति वचसा वैश्वदेवाधिकृतसाग्निकं प्रति पिंडयज्ञांगत्वेन वैश्वदेवोत्तरकालतारूपमनुवा
देयगुणनियमवत्तापि ज्येष्ठाद्यविभक्ततया तदनधिकृतसाग्निकस्य पिंडयज्ञाधिकारो न व्यावर्तते
तथा साधवांप्रसुक्तनियमं कुर्वतापि शास्त्रेण विधवायाः पुत्रप्रतिग्रहेधिकारो न व्यावर्त्तते न चानुज्ञारू
पांगगुणोनुपादेयो येन नापुत्रस्य लोकोस्तीत्यादिवचनेनावश्यकर्तव्योपि सायंकालादिवदधिकार
मवच्छिंद्यादिति सुधीभिरेवालोचनीयं॥ अथांगत्वप्रतिज्ञां परित्यज्यापि भर्त्रनुज्ञारहितां प्रति प्र
तिग्रहनिषेधः क्रियत इत्युच्यते। तथापि न विधवाया अधिकारो व्यावर्तयितुं शक्यते अनुज्ञाशब्दो हि प्र
मभिप्रायवचनो धात्वाधिकारवत्। एवं च जीवतो भर्तुस्तादृशाभिप्रायं तज्जीवनदशायां तन्मरणोत्त
रं वा ज्ञातवत्याः कथं नाधिकारः। त्वया पुत्रः स्वकर्तव्य इति श्रद्दत्तानुज्ञ भर्तृमृते तु विधवयावश्यं क्रियमा
णं पुत्रस्वीकरणं भर्त्रनुज्ञयैव कृतं भवतीति स्फुटं। ब्राह्मणाः संस्थापयत मे यज्ञमित्युक्त्वाहवनी
यं प्रविष्टे यजमाने ऋत्विग्भिः क्रियमाणसर्वस्वारसमापनस्य यजमानानुज्ञातत्ववत्॥ ॥वस्तुत

संस्को० स्तु॥ नापुत्रस्य लोकोस्तीत्यादिशास्त्रेण पुत्राकरणस्य दोषहेतुत्वे भर्त्रनुज्ञारहितां प्रति पुत्राकरणा
६५ भ्यनुज्ञापरमदः शास्त्रं न तु निषेधपरं शास्त्रप्राप्तनिषेधस्यान्याय्यत्वात् पर्युदासलक्षणाप्रसंगादि
ति सुधीभिरूह्यं॥ न च न स्यात्तत्रैव कश्चित् स्त्रिया उत्पन्नभावेनाज्ञातय इति च भर्त्रभावे ज्ञातिपरतंत्रत्वा
त्॥ नापुत्राया विधवाया अधिकारः॥ पुत्रप्रतिग्रहे सिध्यतीति शंकितमप्ययुक्तं रक्षेत्कन्यां पिता विन्नां प
तिः पुत्रास्तु वार्धके॥ अभावे ज्ञातयस्तेषां न स्वातंत्र्यं क्वचित् स्त्रिया इति हि याज्ञवल्क्यवचस्तद्व्याख्या
नोपक्रमे च मिताक्षराकारेणोक्तं पाणिग्रहणात्प्राक्पिता कन्यां अकार्यकरणाद्रक्षेदिति॥ एवं च
निषिद्धाचरणात्स्त्री निवर्तते न त्वदवस्थायां तत्राधिकार इति वचनस्वरसाद्व्याख्यानाच्च प्रतीयते॥ ननु
विहिताचरणप्रतिबंधेपि न च नित्यकाम्यव्रताद्याचरणे ज्ञातिप्रयते अकृतेति विधवानां अधिकारप्रतिबंध
: कचिद् दृष्टो केरपि शिष्टैर्व्यवह्रियते पत्युर्द्व्यावसाने तु राज्ञा भर्तृस्त्रिया इति मिताक्षरोदाहृतवच राम०
नेन च वल्गुकरीमात्रातिरिहितायां विधवानां राज्ञां विनाप्रत्यादावधिकारभावः स्यात्॥ न च प्र ६५

तादेः पुत्रप्रतिग्रहे कश्चिद्विशेष इति महत्याउिरत्यनाविष्कृतं धर्मशास्त्राभिज्ञानम्मैः॥ न च प्रतिग्रह
मंत्राभावेनाधिकाराभावोक्तिरपि घटते॥ अनुज्ञायां सत्यां वासत्यामपि तस्यामुक्तरीत्याधिकार
निर्णयेरपकारवन्मंत्राध्ययनकल्पनासंभवात्॥ एतेनानुज्ञायां सत्यामं मंत्रकः प्रतिग्रह इति नि
रस्तं॥ तस्माद्विधवयापि स्वीकृतः पुत्रो धनवृत्तिभाक् भवत्येवेति तादृशब्राह्मणस्य वृत्तिप्रतिबंधं
कुर्वतः स्वस्यैवानर्थापयंते ब्राह्मणस्य हन्तो तुप्रति कूलं समाचरेत्तद्विद्भुंजां तु रुक्मीणी स्यादेकः सं
वत्सरान्बहूनिति शास्त्रादित्यलं पल्लवितेन॥ चूडादिसंस्कारेषु कृतेषु कृतेषु पंचमवर्षात्प्रागूर्ध्वं च द
त्तको ग्राह्यः यत्तु अकृतसंस्कार एवापूर्णपंचवर्षकएव दत्तकः स्वीकार्यः॥ दत्ता या अपि तनया निज
गोत्रेण संस्कृता॥ आयांति पुत्रतां सम्यक् अन्यकृअनबीजसमुद्भवाः॥ पितुर्गोत्रेण यः पुत्रः संस्कृत
: पृथिवीपते॥ आचूडांतं न पुत्रतां याति चान्यतः चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः दत्ताद्या
स्तनयास्तेसुरन्यथा दास उच्यते ऊर्ध्वं तु पंचमाद्वर्षान्न दत्ताद्याः सुता नृप॥ गृहीत्वा पंचवर्षीयं पुत्रेष्टिं

सं॰कौ॰ ६६

प्रपमं चरेत्॥ पौनर्भवं तु तनयं जातमात्रं समानयेत्। कृत्वा पौनर्भवष्टोमं जातमात्रस्य तस्य वै
॥ सर्वांस्तु कार्यान्संस्कारान्जातकर्मादिकान्वरः कृते पौनर्भवष्टोमे सुतः पौनर्भवः स्मृत इति
कालिकापुराणादिति॥ तन्नराणां वचसां बहुषु कालिकापुराणपुस्तकेषु दर्शनान्निर्मूलत्वा
दिति केचित्॥ अन्ये तु समूलत्वेपि आद्यश्लोकत्रयस्यासगोत्रदत्तकविषयत्वात्तत्रापपठित
त्वेनांत्यश्लोकस्यापि॥ तद्विषयत्वमेवोचितं॥ अतः सगोत्रस्य दत्तकस्य नायं नियम इति परि
णीतोपि दत्तको भवेदित्याहुः॥ वस्तुतस्तु॥ नासगोत्रेष्वप्युपनयनांतसंस्कारोत्तरं दत्तक-।
सामान्यनिषेधः कर्तुं शक्यः पुराणवचोपि वैदिकलिंगविरुद्धस्मृतिवचसां प्रामाण्यसंभवस्य
बलाबलाधिकरणवार्तिककारसिद्धत्वात्॥ उक्तपौराणकानां च बहूनां च ब्राह्मणविरोधात्॥
तथाहि॥ दत्ताद्य इति॥ नावत्॥ कृत्रिमादीनामपि ग्रहणं इति निर्वादं तत्र च सगोत्रेणासंस्कृतः राम॰
स्वयंदत्तोपि पुत्रो न भवतीति प्रतीयते॥ ब्राह्मणेच॥ शुनःशेपो वैश्वामित्रः पुत्रः स्वयमभवदिति ६६

स्फुटं सूक्तं॥ अथ शुनःशेपो विश्वामित्रस्यांकमाससाद स होवाचाजीगर्तः सौयवसिरृषे पुनर्मे
पुत्रं देहीति नेति होवाच विश्वामित्रो देवा वा इमं मह्यमरासतेति स ह देवरातो वैश्वामित्र आस।
ति॥ अत्र भाष्यं॥ शुनःशेप ऊर्ध्वं कस्य पुत्रोस्त्विति विचारे सति तदीयं छेवनियामिकेति मह
र्षीणां वचनं श्रुत्वा शुनःशेपः स्वेच्छया विश्वामित्रपुत्रत्वमंगीकृत्य सहासादनीयमंकमाससाद
ति न चासावनुपनीतः॥ तादृशस्य वेदाध्ययनासंभवात्॥ अनधीतवेदस्य च वैदिकमंत्रकरणक
प्रजापत्यादिस्तुतौ प्रवृत्त्ययोगात्॥ इंद्रदत्तसुवर्णरथप्रतिग्रहे समंत्रके प्रवृत्त्ययोगाच्च॥ श्रूयते चै
षा॥ तस्मा इंद्रः स्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ तमेतया प्रतीयायशश्वदिंद्र इतीति॥ प्रतीया
यत्प्रतिजग्राहेति व्याख्यातं भाष्ये॥ अतः पौराणवचसां समूलत्वेपि संयोजना॥ अन्यबीजसमुद्भ
वा इति दत्ताद्यास्तनया जातकर्मप्रभृतिभिः संस्कारैर्निजगोत्रेणैव संस्कृता भवेयुः दैवप्रती
ग्रहीतुः सम्यक्पुत्रतां यांति समात्वं च समानगोत्रत्वविशिष्टमसाधारणं॥ तत्र यद्यपि॥ जातक

मादि पुत्रस्य वृद्धिनियोगो न स्मर्यते तथापि तदंगभूतवृद्धिधारकगोत्रसंबंधो बोध्यते चूडायां
तु साक्षादेव तत्संबंधः॥ तद्गोत्रिणं प्रति आर्षेयसंबंधयाज्ञित्वाख्याकरणविधानात्॥ त्रिरूपा
अपि च कन्याः कुमारस्यार्षसंख्ययेति॥ अत एव द्वितीयवचोऽप्यन्यत इति तसिंजप्रत्ययेषा
ष्ठ्यर्थं स्वीकृत्य चकारश्चावधारणार्थमंगीकृत्यैतद्व्याख्येयं॥ आचूडांतं जनकगोत्रेणायः संस्कृत
:स प्रतिग्रहहेतुः पुत्रो भवत्यपि नान्यस्यैव पुत्रतां याति किंतु द्व्यामुष्यायणो द्विगोत्रो भवतीति॥ त
थाचूडायाः प्राक् संस्कारेषु पित्र्यगोत्रेण कृतेष्वपि चूडाप्रभृतिसंस्काराः प्रतिग्रहीत्रा निजगोत्रे
णा चेत्कृताः दैवदत्ताद्यास्ते तनया निजगोत्रेण कृताः स्युः॥ अन्यथा तु अदासतादासवैलक्ष्ण्य।
ण्यं परिच्छेद्या हिंसादिना भवति न तु स्वासाधारणगोत्रत्वमित्यर्थः केन तृतीयवचनेनापि चूडा
दिसंस्काराणां निजगोत्रानुष्ठानस्यैकगोत्रताप्रापकत्वेन तात्पर्याच्चूडाग्रहणाच्च तत्पूर्वसं 
स्कारेषु जनकगोत्रेण कृतेष्वपि संस्काराः॥ प्रतिगृहीतगोत्रेण चेत्कृताः तदा द्व्यामुष्यायणत्वा 

पि न द्विगोत्रत्वं किंतु गृहीतगोत्रत्वमेवेत्युक्तं भवति॥ यथा च प्रतिगृहीतृगोत्रेणाचूडाकर्मतः समान
गोत्रत्वप्रापकं तथा तद्गोत्रेण तच्छाखोक्तविधिनोपनयनं तत्समानशाखीयत्वस्यापि प्रापकं भव
ति॥ यथाह वसिष्ठः॥ ॥ अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः॥ स्वगोत्रेण स्वशाखोक्तविधिना
स्वशाखभागिति यत्तु गर्भोत्पत्त्यादिश्लोकार्धं तत्तु नस्वतंत्रनिषेधपरं॥ अन्तराधर्गतपुत्रेष्टिविधिना
वा कथं भेदापत्तेः॥ अनाहुति बेजनितलाश्वगणाधुकाश्चेत्यस्य पयोहोमविधिशेषत्ववत्पुत्रेष्टिवि
धिशेषत्वमस्य बोध्यं॥ पुत्रेष्टिस्तु अप्यये पुत्रवते पुरोडाशमष्टाकपालं॥ इंद्राय पुत्रिणे पुरोडाशमे
कादशकपालं प्रजाकामोऽग्निरेवास्मै प्रजां प्रजनयति वृद्धामिंद्रः प्रयच्छतीति प्रसिद्धा॥ प्रथमं च
रेदिति संस्कारेभ्यः प्रथममित्यर्थः॥ तथा चान्वारंभणीयया आरंभयोग्यतार्थत्ववत्पुत्रेष्टेः
संस्कारयोग्यतार्थत्वप्रतीतेः॥ नाहत्वासंतत्याचैव पुत्रेष्ट्यपेक्षा न तु द्व्यामुष्यायणे इति सिद्धं॥ ए
वं पौनर्भवे पौनर्भविष्टोमाख्यसोमयागस्यापि संस्कारयोग्यतासिद्धिद्वारा तादृशासंतता वे

सं.कौ. ६९

दोपयोगे बोध्यः ॥ अनाहिताग्नीनां तु पुत्रेष्टसंभवात् पुरोडाशस्थाने चरुः कार्यो ॥ य आहिताग्ने
:पुरोडाशस्तेनाहिताग्नेरग्नेश्च रव इति शाखात् ॥ अतः कृतसंस्कारोऽपि पंचवर्षाधिकवयोऽपि
दत्तको भवतीति सिद्धं ॥ ॥ इति ग्राह्याग्राह्यत्वविवेकः ॥ ॥ कथं ग्राह्य इत्यपेक्षायामाह ॥ ॥ शौ
नकः ॥ शौनकोऽहं प्रवक्ष्यामि पुत्रसंग्रहमुत्तमं ॥ वंध्यो वा मृतपुत्रो वा पुत्रार्थं समुपोष्य च ॥ वाससी कुं
डले दत्त्वा उष्णीषं चांगुलीयकं ॥ आचार्यं धर्मसंयुक्तं वैष्णवं वेदपारगं ॥ बर्हिः कुशमयं चैव पालाशं
चेध्ममेव च ॥ एतानाहृत्य बंधूंश्च ज्ञातीनाहूय यत्नतः बंधूनन्नेन संपूज्य ब्राह्मणांश्च विशेषतः
अन्वाधानादि यत्तंत्रं कृत्वाज्योत्पवनांतकं ॥ दातुः समक्षं गत्वा तु पुत्रं देहीति याचयेत् ॥ दाने
समर्थो दाता तस्मै ये यज्ञेति च पंचभिः ॥ देवस्य त्वेति मंत्रेण हस्ताभ्यां प्रतिगृह्य च ॥ अंगादंगेत्यृचं जप्त्वा
आघ्राय शिशुमूर्धनि ॥ वस्त्रादिभिरलंकृत्य पुत्रच्छायावहं सुतं नृत्यगीतैश्च वाद्यैश्च स्वस्ति राम. ६९
शब्दैश्च संयुतः गृहमध्ये तमाधाय चरुं हुत्वा विधानतः ॥ यस्त्वा हृदेति द्वाभ्यां च तुभ्यमग्रस्त्वै

कया सोमो ददादित्येताभिः प्रत्यृचं पंचभिस्तथा ॥ स्विष्टकृदादि शेषं च कृत्वा होमं समापयेत् ॥ ब्रा
ह्मणानां सपिंडेषु कर्तव्यः पुत्रसंग्रहः तदलाभे सपिंडेषु अन्यत्र तु न कारयेत् ॥ क्षत्रियाणां स्वजा
तौ वै गुरुगोत्रसमेऽपि वा वैश्यानां वैश्यजातेषु शूद्राणां शूद्रजातिषु सर्वेषां चैव वर्णानां जातिष्वेव न चा
न्यतः ॥ दौहित्रं भागिनेयं वा शूद्राणां चापि दीयते ॥ नैकपुत्रेण कर्तव्यं पुत्रदानं कदाचन ॥ बहुपुत्रे
ण कर्तव्यं पुत्रदानं प्रयत्नतः ॥ दक्षिणां गुरुवे दद्यात् यथाशक्ति द्विजोत्तमः ॥ नृपो राष्ट्रार्धमेवापि
वैश्यो रत्नशतत्रयं ॥ शूद्रः सर्वस्वमेवापि अशक्तश्चेद्यथाबलमिति ॥ पंचभिरित्यनंतरं दद्यादि
ति शेषः ॥ द्वाभ्यामिति ॥ द्वाभ्यामभ्यंदे आकूती इति केच ॥ तन्न ॥ वक्ष्यमाणबौधायनसूत्रे कम
लत्वप्रयुक्तलाघवसिद्धप्रपाठकस्थाकाकूतेः स्वीकर्तुमुचितत्वात् ॥ अयं च पुत्रप्रतिग्रहवि
धिर्बह्वृचविषयो बह्वृचगृह्यप्रतिपादकत्वाच्छौनकस्य ॥ यजुर्वेदिनां तु पुत्रप्रतिग्रहविधिमाह बौ
धायनः ॥ पुत्रप्रतिग्रहविधिं व्याख्यास्यामः ॥ शोणितशुक्रसंभवो मातापितृनिमित्तकस्तस्य प्रदा

सं॰कौ॰ ६९ न परित्यागविक्रयेषु ॥ मातापितरौ प्रभवतो न त्वेकः पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि संतानाय पूर्
वेषां न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्तुः प्रतिग्रहीष्यन्नुपकल्पयते द्वे वाससी
द्वे कुंडले अंगुलीयकं चाचार्यं च वेदपारगं ॥ कुशमयं बर्हिः पर्णमयमिध्ममित्यथ बंधूनाहू
य मध्ये राजनि चावेद्य परिषदि चागारमध्ये ब्राह्मणानन्नेन परिविष्य पुण्याहस्वस्त्यृद्धिमिति वा
चयित्वाथ देवयजनोल्लेखनप्रभृत्याप्रणीताभ्यः कृत्वा दातुः समक्षं गत्वा पुत्रं मे देहीति भिक्षे
त ददामीतीतर आह तं परिगृह्णाति धर्माय त्वा गृह्णामि संतत्यै त्वा गृह्णामीत्यथैनं वस्त्रकुंडला
भ्यामंगुलीयकेन चालंकृत्य परिधानप्रभृत्याग्निमुखान्तं कृत्वा पक्वाज्जुहोति यस्त्वा हृदा कीरि
णा मन्यमान इति पुरोनुवाक्यामनूच्य यस्मै त्वं सुकृते जातवेद इति याज्यया जुहोत्यथात्ततीर्हुत्वा
स्विष्टकृत्प्रभृति सिद्धमा धेनुवरप्रदानाद्दक्षिणां ददात्येते च वाससी परिधाय एते कुंडले एतच्चांगु
लीयकं ॥ यद्येवं कृत औरसः पुत्र उत्पद्यते तुरीयभागेन भवतीति ह स्माह बौधायन इति ॥ ॥अंगुली राम॰ ६९

यकमित्यनंतरमनुषक्तेन ददातीत्यनेन कुंडलांगुलीयदानं गृहीतं प्रतिविधा प्रभवत इति ॥ मा
तापितरौ रेवदानाधिकार इत्याशयः ॥ मध्य इति ॥ बंधुसमक्षं राजन्यावेदनं कार्यमित्याशयः ॥ प्रभ
वतीति तुरीयभागमेव लभत इत्याशयः अथ बह्वृचाधिकारिकः शौनकोक्तरीत्या पुत्रप्रतिग्रहप्रयो
गः पूर्वेद्युः कृतोपवासः वाससी कुंडले उष्णीषं चांगुलीयकं ॥ आचार्यं धर्मसंयुक्तं वैष्णवं वेदपा
रगं ॥ बर्हिः कुशमयं चैव इध्मं पालाशमेव च ॥ एतान्याहृत्य बंधूंश्च ज्ञातीनाहूय यत्नतः ॥ ॥ पवित्र
पाणिः प्राणानायम्य देशकालौ संकीर्त्य मम प्रजातंत्वप्रयुक्तपैतृकऋणापाकरणपुन्नामनरकत्राणद्वा
रा श्रीपरमेश्वरप्रीत्यर्थं शौनकोक्तविधिना पुत्रप्रतिग्रहं करिष्ये ॥ तदंगत्वेन स्वस्तिपुण्याहवाचनं
आचार्यवरणं आचार्यस्य मधुपर्केणार्हणं विघ्नपूजनं बंधुवर्गब्राह्मणेभ्योन्नदानं च करिष्ये ॥ त
दादौ निर्विघ्नतासिध्यर्थं गणपतिपूजनं करिष्य इति संकल्प्य वरणांतं कृत्वा मधुपर्कांते पितॄणां कु
लदेवतानां गुरूणां प्रीत्यर्थं ब्राह्मणान् बंधूंश्च भोजयेत् ॥ तत आचार्यः देशकालौ संकीर्त्य यजमानानु

सं॰कौ॰ ऽयापुत्रप्रतिग्रहांगत्वेन विहितहोमं करिष्ये इति संकल्प्य अग्निप्रतिष्ठापनांतं कृत्वा न्वाधानं कु
१० र्यात् चक्षुषी आज्येनेत्यंते अत्र प्रधानं सकृदग्निं पुरं सूर्यासावित्रीं च रुणा अग्निं वायुं सूर्यं प्र
जापतिं च आज्येन शेषेण स्विष्टकृतमित्यादि ॥ अष्टाविंशति मुष्टीन् तंडुलान् निरूप्य तावत्कृत्वः
प्रोक्ष्य आज्योत्पवनांतं कृत्वा ॥ ब्राह्मणेः सह दातुः समक्षं गच्छेत् ॥ दातारं चास्य मे पुत्रं देहीति ब्रा
ह्मण द्वारा याचां कारयेत् ॥ ततो दाता आचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्री
त्यर्थं पुत्रदानं करिष्ये इति संकल्प्य गणपतिं संपूज्य यथाशक्ति चंदनादिना प्रतिग्रहीतारं संपू
ज्य ये यज्ञेनेति पंचानां नाभानेदिष्टो मानव ऋषिः ॥ विश्वे देवा देवता आद्यास्तिस्रः त्रिष्टुभः
पंचम्यनुष्टुप् ॥ पुत्रदाने विनियोगे यज्ञेन दक्षिणया समक्ताः ॥ परिजज्ञिरे इत्यंते इमं पुत्रं तव पैतृ
कऋणापाकरणाय पुन्नामनरकत्राणसिद्ध्यर्थं आत्मनश्च श्रीपरमेश्वरप्रीत्यर्थं तुभ्यमहं राम॰
संप्रददे न मम प्रतिगृह्णातु पुत्रं भवानिति संते प्रतिगृहीत्वा हस्ते साक्षतं जलं क्षिपेत् ॥ ततः प्र १०

तिगृहीता देवस्य त्वेति मंत्रेण हस्तद्वयेन प्रतिगृह्य स्वांके उपवेश्य अंगादंगादिति शिरसुमूर्
ध्नि आजिघ्रेत् ॥ ततो युवं वस्त्राणीति वस्त्रं परिधाप्य तूष्णीमुष्णीषं बध्वा कुंकुमादिना तिलकं
कृत्वा हिरण्यरूप इत्यादिना कुंडलादिभिरलंकृत्य छादितं बालं नृत्यगीतवाद्यैः स्वस्तिनो मिमी
तामित्यादि मंत्रैश्च गृहमानीय हस्तपादौ प्रक्षाल्याचम्य ॥ अग्नेः पश्चिमतो मातुरुत्संगे स्वद
क्षिणतो बालमुपवेश्य आचार्यदक्षिणतः स्वयमुपविशेत् ॥ तत आचार्यो बर्हिरास्तरणादि आज्य
भागांतं कुर्यात् ॥ ततः स्रुवं रुं अवदानविधिना वदाय यस्त्वा हृदा कीरिणेति द्वयोरात्रेयो वसु
श्रुत ऋषिः अग्निर्देवता त्रिष्टुप् छंदः पुत्रग्रहांगहोमे विनियोगः ॥ यस्त्वा हृदा ॥ स्विष्टकृत्
द्वयं क्रमेण पठित्वा स्वाहेति जुहुयात् ॥ यजमानः अग्नय इदं ॥ पुनरवदाय ॥ तुभ्यमग्न इति मंत्र
स्य सूर्यासावित्री सूर्यासावित्र्यनुष्टुप् ॥ पुत्रग्रहांगहो० ॥ तुभ्यमग्ने पर्यवह ॥ सहस्वाहा ॥ सूर्या
सावित्र्या इदं ॥ पुनरवदाय ॥ सोमो ददद् इति पंचानां सूर्यासावित्री ऋषिः सूर्यासावित्री देवता।

सं॰कौ॰ आद्ये द्वे अनुष्टुभौ तृतीया जगती च तुर्या त्रिष्टुप् । पंचम्यनुष्टुप् । पुत्रग्रं॰ पुनः पुनरेव दायपंचभि
११ र्जुहुयात् सर्वत्र सूर्यासावित्र्या इति सागः ततो वस्त्र समस्त्वा वात्स्यतिभि रत्नं कुर्मास्विष्टकृदा ।
दि होमशेषं समाप्य आचार्याय धेनुं दद्यात् । दशात्रीन्वा ब्राह्मणान् भोजयेत् । कर्मणः संपूर्णतां
वाचयित्वा ईश्वरार्पणं कुर्वीतेति शौनकोक्त पुत्र प्रतिग्रहप्रयोगः ॥ एवं यजुर्वेदि कत्यको बौधा
यनोक्तरीत्या प्रयोगो बोध्यः ॥ ततः प्राग संस्कृतस्य स्वस्तिवाचनं नांदीश्राद्धादि पूर्वकं जातक
र्मादिसंस्कारान्कुर्यादिति विशेषः ॥ अथ दत्तकस्य विवाहाद्युपयोगिगोत्रादिनिर्णयः ॥ ॐ
तत्र प्रतिग्रहीत्रा जातकर्मादिभिश्चूडादिभिर्वा संस्कृतस्तु दत्तकगोत्रः । एतमभिप्रेत्यैव गो
त्ररिक्थे जनयितुर्न भजेद्दत्त्रिमः सुत इति शास्त्रमभिप्रवृत्तं । एतद्दत्तस्तु प्रतिग्रहीत्रोप
नयमात्रसंस्कृतस्तु द्व्यन्तर प्रतिग्रहीतो वा देवरातवद्द्विगोत्र एवेति व्यवस्था प्रागवादि त राम॰
था प्येषा व्यवस्था अभिवादनश्राद्धादिगते गोत्रनिर्देशार्था । विवाहे तु दत्तक मात्रेण॰ ११

बीजि प्रतिग्रहीत्रोपि गोत्रप्रवरवर्जनं कार्यं । प्रवरमंजर्यादि निबंधेषु तन्निषेधोक्तेः । इति गो
त्रादिनिर्णयः ॥ गौतम ऊर्ध्वं सप्तमात्पितृबंधुभ्यो बीजिनश्च । मातृबंधुभ्यः पंचमादिति । उक्तं च
॥ वसुदेवांगजाताश्च कौंतेयस्य विरुध्यते इति वार्तिकस्य व्याख्यावसरे माधवसुधाकृता दत्तकवि
षयमेतदित्युक्त्वा गौणसकुल्या जनककुले साप्तपुरुषं सापिंड्यमिति व्याख्यातं तद्विषयत्वेनैव सा
पिंड्यमीमांसायां । अतः कुलद्वयेपि साप्तपुरुषं सापिंड्यं प्रतीयते । पैठीनसिः । त्रीन्मातृतः पंच
पितृतः पुरुषानतीत्य उद्वहेदित्याह । व्याख्यातमेतदपरार्के । दत्तकादिपुत्राणां पितृपक्षे तानि
त्यपिंडगोत्रार्षेयानुप्रत्येतद्युच्यते पंच पितृत इत्यादि । अतश्च प्रतिग्रहीतृपितृकुले साप्तपु
रुषं सापिंड्यं प्रतीयते प्रतिग्रहीतृमातृकुले त्रिपुरुषं सापिंड्यं इति प्राञ्चः । अत्र व्यवस्थोक्ता सा
पिंड्यदीपिकायां दत्तकीबादीनां जनकगोत्रेणोपनयने कृते जनककुले साप्तपुरुषं सापिंड्यं प्र
तिग्रहीतृमातापितृकुलेनिर्वाप्यपिंडलक्षणं त्रिपुरुषं सापिंड्यं पितृग्रहीतृगोत्रेणोपनयने त

सं॰कौ॰ कुलेसाप्तपुरुषमिति॥ उपनयनमात्रेकृते पंचपुरुषं॥ जातकर्माद्युपनयनांतेकृतेसाप्तपुरुषमि
७२ तिमेगनसिवचःसाफल्यायव्याख्येयं॥ नकेवलंदत्तकस्यपरिणयनार्थमेवैषसापिंड्योपन्यासः
किंतुतत्संततेस्तमित्रादिकुलोत्पन्नैःसहसंबंधसंभवनिर्णयार्थमपि॥ अन्यथापार्थसुभद्रयो
र्दत्तकयोःसंबंधासंभवशंकायाअनार्यसुभद्रयोरदत्तकयोःसंबंधासंभवशंकायाआचार्य
कर्तृकोपन्यासस्यतदुपपत्तैसुधायांगौतमीयेउपन्यासस्यालम्बकतापत्तेःयादृशादत्तकस्य।
यासापिंड्यमुक्तंतस्यापतेरपितथैवद्रष्टव्यं॥ अतएवयन्मदनपारिजातेउक्तं॥ दत्तपुत्राःसुतस्य
मातुःप्रतिग्रहीतृमातृःकुलेत्रिपुरुषंसापिंड्यं॥ दत्तपुत्रसुतस्यस्वजनककुलेपंचपुरुषमिति तद
पिपूर्वोक्तरीत्यादत्तकविशेषसंततिविषयत्वेनव्याख्येयं॥ ॥इतिसापिंड्यनिर्णयः॥ ॥दत्तकपु
त्रस्यजन्ममरणयोःपूर्वापरपितृस्त्रिरात्रंसपिंडानामेकरात्रंयद्यसपिंडःपुत्रीकृतःपरपूर्वासुभा राम॰
र्यासुपुत्रेषुकृतकेपुत्र॥ भर्तृपित्रोस्त्रिरात्रंसोदकाहस्तुसपिंडइतिमाधवीयेहारीतवचनात् ७२

॥बैजिकादभिसंबंधादनुरुध्यादघंत्र्यहमिति॥ तादृशादत्तकेनपित्रादिमरणेत्रिरात्रंकार्यं
दत्तकश्चस्वयंदत्तःकृत्रिमःक्रीतएवच॥ सूतकेमृतकेचैवत्र्यहाशौचस्यभागिनः॥ इतिशुद्धि
तत्वब्राह्मणवचनात्सपिंडस्यपुत्रीकरणेतुसपिंडमरणादिनिमित्तंदत्तकस्यतन्मरणादिनि
मित्तंसपिंडानांदशाहरात्रमेवनिर्विवादंसापिंड्यपूर्वोक्तरीत्याव्यवस्थितमाशौचहेतुः॥ इत्याशौच
निर्णयः॥ धनस्वामिनिमृतेतदीयपत्नीदुहित्रादिषुसत्स्वपिदत्तकपुत्रएवरिक्थंलभते॥ द्वादशविधपु
त्राभावेपत्नीदुहितरश्चेत्यादिनापत्न्यादीनांरिक्थग्रहणाधिकारप्रतिपादनात्॥ पश्चादुत्पन्नौरसे
सतितुतृतीयंचतुर्थांशंलभतेपूर्वोत्पादितबौधायनस्मरणात्॥ विधानमालायांतुदत्तपुत्रेयदाजाते
कदाचिदौरसोभवेत्॥ पितुर्वित्तस्यसर्वस्यभवेतांसमभागिनौ॥ अविधानेनवापरिग्राप्तेतिनंद
नः॥ विवाहविधिभाजनंकुर्यान्नधनभाजनंतस्मिन्जातेसुतेदत्तेनकृतेचविधानकेतत्सर्वस्वे
ववित्तस्येसस्वामीपितुरंजसा॥ जातेष्वन्येषुपुत्रेषुदत्तपुत्रपरिग्रहात्॥ पितावेद्विभजेद्वित्तं ने

सं॰कौ॰ वासोऽस्य भागभवेदिति जाते उपनयनं तज्जातकर्मादिसंस्कारविशिष्टतया निष्पन्नत इत्यर्थः ॥ ना
७३ दत्ता संस्कारालाभात्याह विधानमिति ॥ अविधानं संस्कारविध्यलाभः ॥ नंदनः प्रकरणाद्दत्तपुत्रः ॥ अ
विधाने सति पूर्वंस्तोकरीत्या धनलाभमभिप्रेत्याविधानपक्षे आह विधाने सति तस्मिन्नौरसे दत्तवि
षये संस्कारविधाने न कृते स औरसः ॥ परिग्रहात् ॥ अनंतरमिति शेषः ॥ ततश्च प्रतिग्रहीत्रोपनय
नांतसंस्कारसंस्कृतस्यौरसमानांशभागित्वं दत्तकस्य तत्कर्तृसकलतदंतसंस्काररहितस्य तु विवाह
मात्रयोग्यान्यधनलाभः सत्यौरसे कतिपयसंस्कारलाभे चतुर्थांशलाभ इति व्यवस्थेति ॥ ॥ इति दाया
दनिर्णयः ॥ दत्तकपुत्रोऽपि स्त्रीकार उक्तविधिना कार्यः वक्ष्यामि पुत्रसंग्रहमित्यादिगतपुत्रपद
स्य पुमान्पुत्र इत्यादि वैदिकप्रयोगमूलकेन वृत्तिरूढकन्यायेन पुत्रीसाधारण्यात् ॥ दानप्रतिग्र
हविधिपुत्रद्वयविशेषपुंस्त्वाविवक्षा पाद्म इतिहासपुराणेषु कुंत्यादत्तकलोके च्चपत्याभावे राम॰
सा स्त्रीकं न भवेद्दुहितृत्वात्तस्यां संतोषसिध्यर्थमिति दत्तकदीधितः ॥ अकार्यं नंतदेवेन तेन ७३

तस्य मुद्देस्तु सा ॥ ॥ इति श्रीमदापदेवसूनुनाऽनंतदेवेन कृते संस्कारकौस्तुभे दत्तकविधिः ॥ ॥ अथ
गर्भिण्या गर्भस्रावहरणं महार्णवे ॥ ॥ वायुपुराणे ॥ यज्ञोपवीतं कुर्वीत स्वकांचनं तु स्वशक्तितः ॥ अ
त्यंतवर्णयुक्तं च राजतं चोत्तरीयकं पलार्धेन तदर्धेन तदर्धेनाथवा पुनः ॥ ग्रंथिप्रदेशे पदं तु मौक्ति
कं वज्रमेव च ॥ प्रस्था ॥ त्पंचगव्येन गायत्र्या ताम्रभाजने द्रोणप्रमाणं तस्मिंस्तु निक्षिपेद्दधिमध्यतः ॥
आज्यस्योपरि संस्थाप्य यज्ञोपवीतं सुपूजितं गंधपुष्पाक्षतैर्धूपैर्दीपैर्नैवेद्यभक्तितः ततो ब्राह्मणमाहूय
होमं तत्र च कारयेत् ॥ तिलैराज्येन मधुना तामिस्रैरष्टोत्तरं शतं ॥ तस्मै हुतवते देयं वस्त्राद्यैः पूजिताय तु
॥ मंत्रेणानेन विधिवत्प्राङ्मुखायोपवीतकं ॥ मंत्रः ॥ उपवीतं परिमितं ब्रह्मणा विधृतं पुरा ॥ अवनोका
त्यदानेन गर्भं संधारयेत्वहं ॥ धनान्यपि ब्राह्मणेभ्यस्तस्मिन्काले प्रदापयेत् ॥ अनुव्रज्य ततो या का
र्यो प्रणिपत्य क्षमापयेत् गर्भस्रावकरा दोषा देवं कृत्वा विमुच्यत इति ॥ अत्यंतवर्णयुक्तं उत्कृष्टं र त
त्नकं च नराजताभ्यां समर्प्यते ॥ यज्ञोपवीतग्रंथौ मौक्तिकं उत्तरीयग्रंथौ वज्रं ॥ गायत्र्येत्यस्य प्रस्थाज्ये

सं॰कौ॰
१५

ताने नान्वयः तस्मिन्मध्यभागे द्रोणप्रमाणं दधि निक्षिप्य तस्य मध्ये द्रोणमाज्यं निःक्षिपेत् प्रस्थमाढकं
द्रोणं चत्वारि कांचेति द्रोणपरिमाणं ॥ तस्मिन् राज्ये ब्रोभनमुपवीतं सोत्तरीयं विन्यस्य गंधाद्युपचारैः पू
जितं कुर्यादिति शेषः आज्यस्य द्रोणपरिमाणासंभवे यथाशक्त्यनुसारि प्रमाणं ॥ मंत्र पूज्या योगाय यज्ञे वहो
मत्तुल्यात्तत्र योगायत्री वास्मधिकरं चेदं कर्मेति महार्णवः अतः पूजां भर्ता कुर्यात्तदभावे ब्राह्मणः कु
र्यात् होमं तु ब्राह्मण एव त्यागं भर्ता तदभावे तस्यैव कुर्यात् ॥ आज्यमधुमिश्रैस्तिलैरष्टोत्तरशतमाहुत
यः प्रधानं पूर्वोत्तरतंत्रं स्वगृह्योक्तकार्यं ॥ होमांते ब्राह्मणपूजा वस्त्रादिभिः कार्या ततो ब्राह्मणायपत्र
च्युतखायपददशमुखा ॥ धिकारिणी मंत्रेण दानं कुर्यात् ॥ विधिरिति पात्रस्य नाम गोत्रोच्चरणादि गर्भस्त्रा
व विधान दोषपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं इति फलं कीर्त्तनं मात्रेण सावित्र्यादि पाठे यथाशक्ति
दक्षिणादानं चेति प्राप्यते ॥ मंत्र नौका दुःखतरणोपायभूताभवेत्सर्वः ततो ब्राह्मणेभ्यो यथाशक्ति द
क्षिणां दत्वा पवात प्रतिष्ठा तु रस्तु ब्रज्य प्रणिपात क्षमापनानि कृत्वा यथाशक्ति ब्राह्मणान्भोजयि

राम॰
१५